श्रीहयग्रीवायनमः॥ सत्प्रतिपक्षत्वंनसमानबलबोधितसाध्यविपर्ययलिंगत्वमितिमूलं॥ बोधितः साध्यविपर्ययोयेनतत्
बोधितसाध्यविपर्ययं॰ समानंबलंयस्यतत्समानबलं॰ बोधितसाध्यविपर्ययंचतत्लिंगंचबोधितसाध्यविपर्ययलिंगं॥
समानबलंबोधितसाध्यविपर्ययलिंगंयस्यतत्समानबलबोधितसाध्यविपर्ययलिंगं॰तस्यभावस्तत्वं॥ बलंचव्या
प्तिपक्षधर्मत्वादि॥ प्रकृतहेतुसंबंधिबलप्रतियोगिकसाम्यंप्रतिहेतुसंबंधिबलेविवक्षितं॰ साम्यंचानुमितिप्रयोजकत्वे
न॥ तथाचसमानपदसमभिव्याहारेण प्रकृतहेतुप्रतिहेत्वोरनुमापकबलवत्त्वलाभेनप्रकृतसाध्यानुमापकबल
शालित्वेसतिसाध्याभावानुमापकबलशालिहेतुत्वरूपत्वंसत्प्रतिपक्षव्यवहारनिर्वाहकंलक्षणमितिपर्यवसितल
क्षणार्थः॥ एतच्चसद्धेतुसाधारण्येनदशाविशेषेसत्प्रतिपक्षव्यवहारोपयिकमितिमूलाभिप्रायः॥ एतच्चनोपप
द्यते॥ अत्रानुमापकत्वमनुमित्यात्मकफलोपहितत्वंवा अनुमितियोग्यत्वंवा॥ तदुपहितत्वंचबलेस्वविषयकनिश्चयाव्य
वहितोत्तरानुमितिकत्वं॥ तद्योग्यत्वंचानुमितिजनकपरामर्शीयविषयतावच्छेदकधर्मवत्वमितिविकल्प्यतत्राद्ये॰

॥१॥

दूषणमाह॥ परस्परेति॥ प्रकृतहेतुप्रतिहेत्वोः परामर्शसंवलनदशायामेव हेतौ सत्प्रतिपक्षव्यवहारदर्शनात्तदानीं परस्परप्रति
बंधेनानुमितिसामान्यस्याप्यनुदयात्साधकत्वोन संभवतीति भावः॥ विरोधिसंवलनदशायामेकैकपरामर्शस्य प्रत्येकानु
मितिजनकत्वसंभवेन नहि विषये बलस्य निरुक्तयोग्यत्वं निर्विवादमिति द्वितीयपक्षाश्रयणेन दोषमुद्धरतस्तत्र बलपदार्थं
वितर्क्य दूषयति॥ बलंचेति॥ नपक्षसत्वादीति॥ आदिना पक्षसत्वविपक्षासत्वयोः परिग्रहः॥ लव्ध्यानुमापकत्वमनुमितिज
नकतावच्छेदकविषयितानिरूपकतावच्छेदकधर्मवत्त्वरूपं॥ एतच्च पक्षसत्वादिविशिष्टहेतुज्ञानस्य जनकत्वाभिप्रायेण॥
व्यतिरेकिण्यपीति॥ पृथिवी इतरेभ्यो भिद्यते गंधादित्यादौ पृथिवी इतरभेदव्याप्यगंधवती इतरभेदाभावव्याप्यजलत्वादि
मतीचेति परामर्शद्वयसंवलनदशायां हेतौ सत्प्रतिपक्षव्यवहारदर्शनात्तदानीं तस्य बलस्य तत्त्वात्तत्र सपक्षाप्रसिद्ध्या तादृश
बलवत्त्वाभावेन तादृ-- नश्य हेतावव्याप्तेरित्यर्थः॥ बलपदस्य व्याप्तिपक्षधर्मतापरत्वे दोषमाह॥ नापीति॥ समाने
तिसंपातायातं॥ बलपदार्थस्य समानत्वाघटितत्वाद्- विरोधेनेति॥ विरुद्धसाध्यतदभावव्याप्ययोरेकत्रासत्वनियमेनेत्यर्थः॥ ॥१

तद्वं गेति॥ व्याप्तिपक्षधर्मतयोरेकतराभावे सत्यर्थः॥ विरुद्धसाध्यतदभावव्याप्ययोरेकत्र सत्त्व एव प्रकृतहेतुप्रतिहेत्वोस्तत्तत्साध्य
निरूपितव्याप्तिपक्षधर्मतयोः सत्त्वनियमः॥ ह्रदो वह्निमान्धूमादित्यादौ जलत्वादेः प्रतिहेतुत्वे प्रतिहेतौ व्याप्तिपक्षधर्मतयोः सत्त्वे
ऽपि व्याप्ये प्रकृतहेतौ पक्षधर्मताभावेन तत्रान्यतराभावो नियतः॥ पर्वतो वह्निमान्धूमादित्यादौ वह्न्यभावव्याप्यपाषाणमयत्व
वान्पर्वत इति प्रतिपरामर्शदशायां धूमात्मके हेतौ व्यक्तिस्थलया प्रकृतहेतौ व्याप्तिपक्षधर्मतोभयसत्त्वेऽपि पक्षधर्मे प्रतिहेतौ
वह्न्यभावव्याप्यसत्त्वेन प्रतिहेतौ वह्न्यतराभावस्य सत्त्वमिति क्रमेण सदसत्साधारण्येन प्रकृतहेतुप्रतिहेत्वोः व्याप्तिपक्ष
धर्मतयोरेकतराभावनियत इति सत्प्रतिपक्षासंग्रह इति भावः॥ व्याप्तिपक्षधर्मतयोर्बलपदार्थत्वे दूषयित्वा तद्दु
यान्तत्वस्य बलपदार्थपक्षमपि दूषयति॥ नापीति॥ व्याप्तिपक्षधर्मतया॰ व्याप्तिसहितपक्षधर्मतया॥ ज्ञातत्वं ज्ञायमान
त्वं॥ व्याप्तिविशिष्टस्ववैशिष्ट्यज्ञानविषयपक्षकत्वमिति समुदितार्थः॥ ह्रदो वह्निमान्धूमादित्यादौ जलत्वादेः प्रतिहेतुत्वे प्रकृ
तपरामर्शप्रतिपरामर्शयोः पक्षांशे व्याप्तिविशिष्टस्ववैशिष्ट्यावगाहितयोभयत्रापि निरुक्तबलसंपत्तिः॥ सदसद्धेतुसा

धारण्येन व्याप्तिविशिष्टस्य वैशिष्ट्यावगाहिभ्रमप्रमासाधारणनिश्चयमादाय सत्प्रतिपक्षत्वोपपत्तिरित्यभिमानेनेदं ॥ तादृ
शाभिमानेनैव निराचष्टे ॥ विरोधिव्याप्तीति ॥ अन्यतरस्य भ्रमत्वनियमेनेति ॥ असत्यपि तौ प्रकृतपरामर्शस्य व्याप्त्यंशे भ्रमत्वात्-
सत्येऽनुस्थले प्रतिपरामर्शस्य तथात्वेनान्यतरस्य भ्रमत्वं नियतमिति भावः ॥ नियतव्याप्येति ॥ शब्दोऽनियतः कृतकत्वादित्या
दौ श्रावणत्वादिरूपप्रतिहेतोः बलस्य भ्रमात्मकव्याप्यवत्ताज्ञानस्यारोप्याप्रसिद्ध्याऽसंभवेन समानबलत्वासंभवादि
त्यर्थः ॥ व्याप्येऽपक्षधर्मे पक्षधर्मत्वप्रकारकभ्रमस्याव्याप्ये पक्षधर्मे व्याप्यत्वभ्रमस्य बलपदार्थत्वमङ्गीकृत्यापक्षधर्मे व्या
प्ये व्याप्तिविशिष्टस्वविषयकपक्षधर्मताज्ञानकत्वं बलं ॥ अव्याप्ये पक्षधर्मे पक्षधर्मताविशिष्टस्वविषयकव्याप्ति-
ज्ञानकत्वं बलमित्याशंक्य निषेधति ॥ नचेति ॥ एकत्रेति ॥ अनयोरेकैकतरस्यानिवेशे सकलसत्प्रतिपक्षासंग्रहः ॥ अव्या
प्यादिप्रतिहेतोः व्याप्त्यादिविशिष्टत्वाप्रसिद्धेरतो व्याप्तिविशिष्टस्य वैशिष्ट्यज्ञानविषयकत्वमित्युक्तरीत्या विशिष्टारोप
एव निवेशनीयः ॥ इत्थं च प्रकृतहेतौ तद्भिन्ने वा विरोधिव्याप्तिसिद्धय पक्षधर्मतयोः सत्त्व एव वारोप्यप्रसिद्धि संभावनया विशि ॥२॥

स·
॥३॥

ष्टारोपस्य बलपदार्थता घटते। विरोधिव्याप्तिद्वयस्यैकत्र सत्वमेवासंभावितमिति विशिष्टारोपघटितस्य बलपदार्थता
न संभवतीत्येकत्रैया हेराशयः॥ श्री॥छ॥ श्री॥छ॥ ॥ श्री॥छ॥ श्री॥छ॥ ॥ श्री॥छ॥ ॥ श्री॥छ॥ ॥ ॥

चैत्रमासे शुक्लपक्षे सर्वजिद्वत्सरे शुभे॥ पौर्णिमायां महीसूरे लिखितं भृगुवासरे॥१५ श्री॥छ॥
कुंभीगिरिं भान्वयोत्थेन कुंभघोणनिवासिना॥ नारायणाख्यसुधिया लिखिता क्रोडपत्रिका॥२॥